# SHRIMAD BHAGWAT RASIK KUTUMBA

श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

## Uddhav Geeta, Third Sopan(11.18)



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

**नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।**
**देवीं(म्) सरस्वतीं(वँ) व्यासं(न्), ततो जयमुदीरयेत्॥**

**nārāyaṇaṃ(n) namaskṛtya, naraṃ(ñ)caiva narottamam**
**devīṃ(m) sarasvatīṃ(ṽ) vyāsaṃ(n), tato jayamudīrayet**

**नामसङ्कीर्तनं(यँ) यस्य, सर्वपापप्रणाशनम्।**
**प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्॥**

**nāmasaṅkīrtanaṃ(ỹ) yasya, sarvapāpapraṇāśanam**
**praṇāmo duḥkhaśamanas, taṃ(n) namāmi hariṃ(m) param**

**श्रीमद्भागवतमहापुराणम्**

**एकादशः स्कन्धः**

**॥ अथ अष्टादशोऽध्यायः ॥**

**Śrīmadbhāgawatamahāpurāṇam**

**Ekādaśḥ skandhaḥ**

**.. atha aṣṭādaśo'dhyāyaḥ ..**

## श्रीभगवानुवाच

**वनं(वँ) विविक्षुः(फ्) पुत्रेषु, भार्यां(न्) न्यस्य सहैव वा ।**
**वन एव वसेच्छान्तस्- तृतीयं(म्) भागमायुषः ॥ 1॥**

śrībhagavānuvāca

vanaṃ(ṽ) vivi*kṣuḥ(ph) pu*treṣu, bhāryāṃ(n) nya*sya sahaiva vā .

vana eva vasecchānta*s-tṛtīyaṃ(m) bhāgamāyuṣaḥ .. 1..

asec+chān+tas

क*न्दमूलफलैर्व*न्यैर्- मेध्यैर्वृत्तिं(म्) प्रक*ल्पयेत् ।

वसीत व*ल्कलं(वँ्) वास*स्-तृणपर्णाजिनानि च ॥ 2॥

K*andamūlaphalairva*nyair- medhyairvṛttiṃ(m) praka*lpayet .

vasīta va*lkalaṃ(ṽ) vāsa*s- tṛṇaparṇājināni ca .. 2..

Kandamūla+phalair+vanyair, medhyair+vṛttiṃ(m), tṛṇa+parṇā+jināni

केशरोमनख*श्म*श्रु-मलानि बिभृयाद् दतः ।

न धावेद*प्सु मज्जेत*, त्रिकालं(म्) स्थ*ण्डिलेशयः ॥ 3॥

Keśaromanakha*śma*śru- malāni bibhṛyād dataḥ .

na dhāveda*psu majjeta*, trikālaṃ(m) stha*ṇḍileśayaḥ .. 3..

keśaro+manakhaś+maśru

ग्रीष्मे त*प्येत पं(ञ्)चाग्नीन् , वर्षास्वासारषाड्जले ।

आक*ण्ठम*ग्नः(श्) शिशिरे, एवं(वँ्)वृत्त*स्तप*श्चरेत् ॥ 4॥

grīṣme ta*pyeta paṃ(ñ)cāgnīn, varṣāsvāsāraṣāḍjale .

āka*ṇṭhama*gnaḥ(ś) śiśira, evaṃ(ṽ)vṛtta*stapa*ścaret .. 4..

paṃ(ñ)+cāg+nīn, varṣās+vāsā+raṣāḍ+jale

evaṃ(ṽ)+vṛttas+tapaś+caret

अ*ग्निप*क्वं(म्) सम*श्नीयात्, कालप*क्वमथापि वा ।

उलूखलाश्मकुट्टो वा, द*न्तोलूखल एव वा ॥ 5॥

*agnipa*kvaṃ(m) sama*śnīyāt, kālapa*kvamathāpi vā .

ulūkhalāśmakuṭṭo vā, da*ntolūkhala eva vā .. 5..

samaś+ nīyāt, ulūkhalāś+ makuṭ+ ṭo

स्वयं(म्) सं(ञ्)चिनुयात् सर्व- मात्मनो वृत्तिकारणम् ।

देशकालबलाभि*ज्ञो, नाददीतान्यदाऽऽहृतम् ॥ 6॥

svayaṃ(m) saṃ(ñ)cinuyāt sarva- mātmano vṛttikāraṇam .

deśakālabalābhi*jño, nādadītānyadā''hṛtam .. 6..

nādadītān+yadā''hṛtam

व*न्यैश्चरुपुरोडाशैर्- निर्वपेत् कालचोदितान् ।

न तु* श्रौतेन पशुना, मां(यँ) यजेत वनाश्रमी ॥ 7॥

va*nyaiścarupuroḍāśair- nirvapet kālacoditān .

na tu* śrautena paśunā, māṃ(y̐) yajeta vanāśramī .. 7..

vanyaiś+ carupuro+ ḍāśair, kālaco+ ditān

अ*ग्निहोत्रं(ञ्) च दर्श*श्च, पूर्णमास*श्च पूर्ववत् ।

चातुर्मास्यानि च मुने- राम्नातानि च नैगमैः ॥ 8॥

a*gnihotraṃ(ñ) ca darśa*śca, pūrṇamāsa*śca pūrvavat .

cāturmāsyāni ca mune- rāmnātāni ca naigamaiḥ .. 8..

cātur+ māsyāni, rām+ nātāni

एवं(ञ्) चीर्णेन तपसा, मुनिर्धमनिस*न्ततः ।

मां(न्) तपोमयमाराध्य, ऋषिलोकादुपैति माम् ॥ 9॥

evaṃ(ñ) cīrṇena tapasā, munirdhamanisa*ntataḥ .

māṃ(m) tapomayamārādhya, ṛṣilokādupaiti mām .. 9..

unir+ dhama+ nisan+ tataḥ

यस्त्वेतत् कृच्छ्र*तश्चीर्णं(न्), तपो निः(श्)श्रेयसं(म्) महत् ।

कामायाल्पीयसे युञ्ज्याद्, बालिशः(ख्) कोऽप*रस्ततः||10||

yastvetat kṛcchrata*ścīrṇaṃ(n), tapo niḥ(ś)śreyasaṃ(m) mahat .

kāmāyālpīyase yuñjyād, bāliśaḥ(kh) ko'para*stataḥ .. 10..

yas+tvetat, kṛcchra+ taś+ cīrṇaṃ(n)

यदासौ नियमेऽकल्पो, जरया जातवेपथुः ।

आत्मन्यग्नीन् समारोप्य, मच्चित्तोऽग्निं(म्) समाविशेत् ॥ 11 ॥

yadāsau niyame'kalpo, jarayā jātavepathuḥ .

ātmanyagnīn samāropya, maccitto'gniṃ(m) samāviśet .. 11..

ātman+ yag+ nīn

यदा कर्मविपाकेषु , लोकेषु निरयात्मसु ।

विरागो जायते सम्यङ्, न्यस्ताग्निः(फ्) प्रव्रजेत्ततः ॥ 12 ॥

yadā karmavipākeṣu, lokeṣu nirayātmasu .

virāgo jāyate samyaṅ, nyastāgniḥ(ph) pravrajettataḥ .. 12..

pravrajet+ tataḥ

इष्ट्वा यथोपदेशं(म्) मां(न्), दत्त्वा सर्वस्वमृत्विजे ।

अग्नीन् स्वप्राण आवेश्य, निरपेक्षः(फ्) परिव्रजेत् ॥13 ॥

iṣṭvā yathopadeśaṃ(m) māṃ(n), dattvā sarvasvamṛtvije .

agnīn svaprāṇa āveśya, nirapekṣaḥ(ph) parivrajet .. 13..

sarvasva+ mṛtvije

विप्रस्य वै सं(न्)न्यसतो, देवा दारादिरूपिणः ।

विघ्नान् कुर्वन्त्ययं(म्) ह्यस्मा- नाक्रम्य समियात् परम् ॥ 14 ॥

viprasya vai saṃ(n)nnyasato, devā dārādirūpiṇaḥ .

vighnān kurvantyayaṃ(m) hyasmā- nākramya samiyāt param .. 14..

kurvan+ tyayaṃ(m)

बिभृयाच्चेन्मुनिर्वासः(ख्), कौपीनाच्छादनं(म्) परम् ।

त्यक्तं(न्) न दण्डपात्राभ्या- मन्यत् किं(ञ्)चिदनापदि ॥ 15 ॥

bibhṛyāccenmunirvāsaḥ(kh), kaupīnācchādanaṃ(m) param .

tyaktaṃ(n) na daṇḍapātrābhyā- manyat kiṃ(ñ)cidanāpadi .. 15..

bibhṛyāc+ cenmunir+ vāsaḥ(kh)

*दृष्टिपूतं(न्) न्यसेत् पादं(वँ), वस्त्रपूतं(म्) पिबेज्जलम् ।
*सत्यपूतां(वँ) वदेद् वाचं(म्), मनः(फ्)पूतं(म्) समाचरेत् ॥ 16॥

d*ṛṣṭipūtaṃ(n) nyaset pādaṃ(ṽ), vastrapūtaṃ(m) pibejjalam .
s*atyapūtāṃ(ṽ) vaded vācaṃ(m), manaḥ(ph)pūtaṃ(m) samācaret .. 16..

pibej+jalam

मौनानीहानिलायामा, *दण्डा वाग्देहचेतसाम् ।
न ह्येते *यस्य सन्त्यं(ङ्)ग, वेणुभिर्न भवेद् यतिः ॥ 17॥

Maunānīhānilāyāmā, d*aṇḍā vāgdehacetasām .
na hyete y*asya santyaṃ(ṅ)ga, veṇubhirna bhaved yatiḥ .. 17..

maunānī+ hānilā + yāmā, san+ tyaṃ(ṅ)ga

*भिक्षां(ञ्) चतुर्षु वर्णेषु, विगर्ह्यान् वर्जयं(म्)श्चरेत् ।
*सप्तागारानसं(ङ्)क्*लृप्तां(म्)स्- *तुष्येल्*लब्धेन तावता ॥ 18॥

bhi*kṣāṃ(ñ) caturṣu varṇeṣu, vigarhyān varjayaṃ(m)ścaret .
s*aptāgārānasaṃ(ṅ)k*ḷptāṃ(m)s- t*uṣyell*abdhena tāvatā .. 18..

vigar+ hyān, saptāgārā+nasaṃ(ṅ)kḷp+ tāṃ(m)s,
tuṣyel+ lab+ dhena

बहिर्जलाशयं(ङ्) *गत्वा, *तत्रो*प*स्पृश्य वाग्यतः ।
विभ*ज्य पावितं(म्) शेषं(म्), भुं(ञ्)जीताशेषमाहृतम् ॥ 19॥

bahirjalāśayaṃ(ṅ) g*atvā, t*atrop*asp*ṛśya vāgyataḥ .
vibh*ajya pāvitaṃ(m) śeṣaṃ(m), bhuṃ(ñ)jītāśeṣamāhṛtam .. 19..

tatropas+ pṛśya,
bhuṃ(ñ)jītā+ śeṣamā+ hṛtam

एक*श्चरेन्महीमेतां(न्),निः(स्)सं(ङ्)गः(स्) सं(यँ)यतेन्द्रियः ।
आत्म*क्रीड आत्मरत, आत्मवान् समदर्शनः ॥ 20॥

ekaścarenmahīmetāṃ(n), niḥ(s)saṃ(ṅ)gaḥ(s) saṃ(ỹ)yatendriyaḥ .

ātmakrīḍa ātmarata, ātmavān samadarśanaḥ .. 20..

ekaś+ caren+ mahīmetāṃ(n)

विविक्तक्षेमशरणो, मद्भावविमलाशयः ।

आत्मानं(ञ्) चिन्तयेदेक-मभेदेन मया मुनिः ॥ 21॥

viviktakṣemaśaraṇo, madbhāvavimalāśayaḥ .

ātmānaṃ(ñ) cintayedeka- mabhedena mayā muniḥ .. 21..

viviktakṣe+ maśaraṇo

अन्वीक्षेतात्मनो बन्धं(म्), मोक्षं(ञ्) च ज्ञाननिष्ठया ।

बन्ध इन्द्रियविक्षेपो, मोक्ष एषां(ञ्) च सं(यँ)यमः ॥ 22॥

anvīkṣetātmano bandhaṃ(m), mokṣaṃ(ñ) ca jñānaniṣṭhayā .

bandha indriyavikṣepo, mokṣa eṣāṃ(ñ) ca saṃ(ỹ)yamaḥ .. 22..

anvīkṣe+ tātmano

तस्मान्नियम्य षड्वर्गं(म्), मद्भावेन चरेन्मुनिः ।

विरक्तः(ह) क्षुल्लकामेभ्यो, लब्ध्वाऽऽत्मनि सुखं(म्) महत् ॥ 23॥

tasmānniyamya ṣaḍvargaṃ(m), madbhāvena carenmuniḥ .

viraktaḥ(h) kṣudrakāmebhyo, labdhvā''tmani sukhaṃ(m) mahat .. 23..

tasmān+ niyamya

पुरग्रामव्रजान् सार्थान्, भिक्षार्थं(म्) प्रविशं(म्)श्चरेत् ।

पुण्यदेशसरिच्छैल-वनाश्रमवतीं(म्) महीम् ॥ 24॥

puragrāmavrajān sārthān, bhikṣārthaṃ(m) praviśaṃ(m)ścaret .

puṇyadeśasaricchaila- vanāśramavatīṃ(m) mahīm .. 24..

puṇyade+ śasaric+ chaila

वानप्रस्थाश्रमपदेष्- वभीक्ष्णं(म्) भैक्ष्यमाचरेत् ।
संम्(म्)सिध्यत्याश्वसं(म्)मोहः(श्),शुद्धसत्त्वः(श्) शिलान्धसा ॥ 25॥

vānaprasthāśramapadeṣ- vabhīkṣṇaṃ(m) bhaikṣyamācaret .
saṃ(m)sidhyatyāśvasaṃ(m)mohaḥ(ś), śuddhasattvaḥ(ś) śilāndhasā .. 25..

vānaprasthā+śramapadeṣ, saṃ(m)sidhyat+ yāś+ vasaṃ(m)mohaḥ(ś)

नैतद् वस्तुतया पश्येद्, दृश्यमानं(वँ) विनश्यति ।
असक्तचित्तो विरमे-दिहामुत्र चिकीर्षितात् ॥ 26॥

Naitad vastutayā paśyed, dṛśyamānaṃ(ṽ) vinaśyati .
asaktacitto virame- dihāmutra cikīrṣitāt .. 26..

cikīr+ ṣitāt

यदेतदात्मनि जगन्-मनोवाक्प्राणसं(म्)हतम् ।
सर्वं(म्) मायेति तर्केण, स्वस्थस्त्यक्त्वा न तत् स्मरेत् ॥ 27॥

yadetadātmani jagan- manovākprāṇasaṃ(m)hatam .
sarvaṃ(m) māyeti tarkeṇa, svasthastyaktvā na tat smaret .. 27..

yade+tadātmani,

manovāk+ prāṇa+ saṃ(m)hatam, svasthas+ tyaktvā

ज्ञाननिष्ठो विरक्तो वा, मद्भक्तो वानपेक्षकः ।
सलिं(ङ्)गानाश्रमां(म्)स्त्यक्त्वा, चरेदविधिगोचरः ॥ 28॥

jñānaniṣṭho virakto vā, madbhakto vānapekṣakaḥ .
saliṃ(ṅ)gānāśramāṃ(m)styaktvā, caredavidhigocaraḥ .. 28..

saliṃ(ṅ)gānā+ śramāṃ(m)s+ tyaktvā

बुधो बालकवत् क्रीडेत्, कुशलो जडवच्चरेत् ।
वदेदुन्मत्तवद् विद्वान्, गोचर्यां(न्) नैगमश्चरेत् ॥ 29॥

budho bālakavat krīḍet, kuśalo jaḍavaccaret .

vadedunmattavad vidvān, gocaryāṃ(n) naigamāścaret .. 29..

vadedun+ mat+tavad

वेदवादरतो न स्यान्- न पाखण्डी न हैतुकः ।

शुष्कवादविवादे न, कं(ञ्)चित् पक्षं(म्) समाश्रयेत् ॥ 30॥

vedavādarato na syān- na pākhaṇḍī na haitukaḥ .

śuṣkavādavivāde na, kaṃ(ñ)cit pakṣaṃ(m) samāśrayet .. 30..

śuṣkavā+ davivāde

नोद्विजेत जनाद् धीरो, जनं(ञ्) चोद्वेजयेन्न तु ।

अतिवादां(म्)स्तितिक्षेत, नावमन्येत कं(ञ्)चन ।

देहमुद्दिश्य पशुवद्, वैरं(ङ्) कुर्यान्न केनचित् ॥ 31॥

nodvijeta janād dhīro, janaṃ(ṅ) codvejayenna tu .

ativādāṃ(n)stitikṣeta, nāvamanyeta kaṃ(ñ)cana .

dehamuddiśya paśuvad ,vairaṃ(ṅ) kuryānna kenacit .. 31..

cod+ vejayen+ na,

ativādāṃ(n)s+ titikṣeta

एक एव परो ह्यात्मा, भूतेष्वात्मन्यवस्थितः ।

यथेन्दुरुदपात्रेषु, भूतान्येकात्मकानि च ॥ 32॥

eka eva paro hyātmā, bhūteṣvātmanyavasthitaḥ .

yathendurudapātreṣu, bhūtānyekātmakāni ca .. 32..

bhūteṣvāt+ manya+ vasthitaḥ,

yathen+ duru+ dapātreṣu, bhūtānye+ kāt+ makāni

अलब्ध्वा न विषीदेत, काले कालेऽशनं(ङ्)क्वचित् ।

लब्ध्वा न हृष्येद् धृतिमा- नुभयं(न्) दैवतन्त्रितम् ॥ 33॥

alabdhvā na viṣīdeta, kāle kāle'śanaṃ(ṅ)kvacit .

labdhvā na hṛṣyed dhṛtimā- nubhayaṃ(n) daivatantritam .. 33..

daivatan+ tritam

आहारार्थं(म्) समीहेत, युक्तं(न्) तत् प्राणधारणम् ।

तत्त्वं(वँ) विमृश्यते तेन, तद् विज्ञाय विमुच्यते ॥ 34॥

āhārārthaṃ(m) samīheta, yuktaṃ(n) tat prāṇadhāraṇam .

tattvaṃ(ṽ) vimṛśyate tena, tad vijñāya vimucyate .. 34..

यदृच्छयोपपन्नान्न-मद्याच्छ्रेष्ठमुतापरम् ।

तथा वासस्तथा शय्यां(म्),प्राप्तं(म्) प्राप्तं(म्) भजेन्मुनिः ॥ 35॥

yadṛcchayopapannānna- madyācchreṣṭhamutāparam .

tathā vāsastathā śayyāṃ(m), prāptaṃ(m) prāptaṃ(m) bhajenmuniḥ .. 35..

yadṛcchayo+ papan+ nān+ na, madyāc+ chreṣṭha+ mutāparam

शौचमाचमनं(म्) स्नानं(न्), न तु चोदनया चरेत् ।

अन्यां(म्)श्च नियमान् ज्ञानी, यथाहं(लँ) लीलयेश्वरः ॥ 36॥

śaucamācamanaṃ(m) snānaṃ(n), na tu codanayā caret .

anyāṃ(m)śca niyamāñ jñānī, yathāhaṃ(l̐) līlayeśvaraḥ .. 36..

śaucamā+ camanaṃ(m)

न हि तस्य विकल्पाख्या, या च मद्वीक्षया हता ।

आदेहान्तात् क्वचित् ख्यातिस् -ततः(स्) सम्पद्यते मया ॥ 37॥

na hi tasya vikalpākhyā, yā ca madvīkṣayā hatā .

ādehāntāt kvacit khyātis - tataḥ(s) sampadyate mayā .. 37..

mad+ vīkṣayā, ādehān+ tāt

दुःखोदर्केषु कामेषु, जातनिर्वेद आत्मवान् ।

अजिज्ञासितमद्धर्मो, गुरुं(म्) मुनिमुपव्रजेत् ॥ 38॥

duḥkhodarkeṣu kāmeṣu, jātanirveda ātmavān .

ajijñāsitamaddharmo, gurum̟(m) munimupavrajet .. 38..

ajijñā+ sitamad+ dharmo

तावत् परिचरेद् भक्तः(श्), श्रद्धावाननसूयकः ।

यावद् ब्रह्म विजानीयान्-मामेव गुरुमादृतः ॥ 39॥

tāvat paricared bhaktaḥ(ś), śraddhāvānanasūyakaḥ .

yāvad brahma vijānīyān- māmeva gurumādṛtaḥ .. 39..

śraddhāvā+ nanasūyakaḥ

यस्त्वसं(यँ)यतषड्वर्गः(फ्), प्रचण्डेन्द्रियसारथिः ।

ज्ञानवैराग्यरहितस्- त्रिदण्डमुपजीवति ॥ 40॥

yastvasaṃ(ỹ)yataṣaḍvargaḥ(ph), pracaṇḍendriyasārathiḥ .

jñānavairāgyarahitas- tridaṇḍamupajīvati .. 40..

yastva+ saṃ(ỹ)yata+ ṣaḍvargaḥ(ph),

pracaṇḍen+ driya+ sārathiḥ, tridaṇḍa+ mupa+ jīvati

सुरानात्मानमात्मस्थं(न्), निह्नुते मां(ञ्)च धर्महा ।

अविपक्वकषायोऽस्मा-दमुष्माच्च विहीयते ॥ 41॥

surānātmānamātmasthaṃ(n) nihnute māṃ(ñ)ca dharmahā .

avipakvakaṣāyo'smā- damuṣmācca vihīyate .. 41..

surānātmā+ namāt+ masthaṃ(n), avipak+ vakaṣ+ āyo'smā

भिक्षोर्धर्मः(श्) शमोऽहिं(म्)सा, तप ईक्षा वनौकसः ।

गृहिणो भूतरक्षेज्या, द्विजस्याचार्यसेवनम् ॥ 42॥

bhikṣordharmaḥ(ś) śamo'hiṃ(m)sā, tapa īkṣā vanaukasaḥ .

gṛhiṇo bhūtarakṣejyā, dvijasyācāryasevanam .. 42..

bhikṣor+ dharmaḥ(ś), bhūta+ rakṣejyā,

dvijas+ yācār+ yasevanam

ब्रह्मचर्यं(न्) तपः(श्) शौचं(म्),सन्तोषो भूतसौहृदम् ।

गृहस्थस्याप्यृतौ गन्तुः(स्), सर्वेषां(म्) मदुपासनम् ॥ 43॥

brahmacaryaṃ(n) tapaḥ(ś) śaucaṃ(m), santoṣo bhūtasauhṛdam .

gṛhasthasyāpyṛtau gantuḥ(s), sarveṣāṃ(m) madupāsanam .. 43..

gṛhasthas+ yāp+ yṛtau

इति मां(यँ) यः(स्) स्वधर्मेण, भजन् नित्यमनन्यभाक् ।

सर्वभूतेषु मद्भावो, मद्भक्तिं(वँ) विन्दते दृढाम् ॥ 44॥

iti māṃ(y̐) yaḥ(s) svadharmeṇa, bhajen nityamananyabhāk .

sarvabhūteṣu madbhāvo, madbhaktiṃ(v̐) vindate dṛḍhām .. 44..

nitya+ mananya+ bhāk

भक्त्योद्धवानपायिन्या, सर्वलोकमहेश्वरम् ।

सर्वोत्पत्त्यप्ययं(म्) ब्रह्म, कारणं(म्) मोपयाति सः ॥ 45॥

Bhaktyoddhavānapāyinyā, sarvalokamaheśvaram .

sarvotpattyapyayaṃ(m) brahma, kāraṇaṃ(m) mopayāti saḥ .. 45..

bhaktyod+ dhavā+ napāyinyā, sarvot+ pattya+ pyayaṃ(m)

इति स्वधर्मनिर्णिक्त- सत्त्वो निर्ज्ञातमद्गतिः ।

ज्ञानविज्ञानसम्पन्नो, नचिरात् समुपैति माम् ॥ 46॥

iti svadharmanirṇikta- sattvo nirjñātamadgatiḥ .

jñānavijñānasampanno, nacirāt samupaiti mām .. 46..

svadharma+ nirṇikta, nirjñā+ tamad+ gatiḥ, jñānavijñā+ nasampanno

वर्णाश्रमवतां(न्) धर्म, एष आचारलक्षणः ।

स एव मद्भक्तियुतो, निः(श्)श्रेयसकरः(फ्) परः ॥ 47॥

varṇāśramavatāṃ(n) dharma, eṣa ācāralakṣaṇaḥ .

sa eva madbhaktiyuto niḥ(ś)śreyasakaraḥ(ph) paraḥ .. 47..

varṇāśra+ mavatāṃ(n), ācā+ ralakṣaṇaḥ

एतत्तेऽभिहितं(म्) साधो, भवान् पृच्छति यच्च माम् ।

यथा स्वधर्मसं(यँ)युक्तो, भक्तो मां(म्) समियात् परम् ॥ 48॥

etatte'bhihitaṃ(m) sādho, bhavān pṛcchati yacca mām .

yathā svadharmasaṃ(ỹ)yukto, bhakto māṃ(m) samiyātparam .. 48..

etat+ te'bhihitaṃ(m)

इति श्रीमद्भागवते महापुराणे पारमहं(म्)स्यां(म्)

सं(म्)हितायां(म्) एकादशस्कन्धे अष्टादशोऽध्यायः ॥ 18॥

iti śrīmadbhāgavate mahāpurāṇe pāramahaṃ(m)syāṃ(m)

saṃ(m)hitāyāṃ(m) ekādaśaskandhe aṣṭādaśo'dhyāyaḥ .. 18..

ॐ पूर्णमदः(फ्) पूर्णमिदं(म्) पूर्णात्पूर्णमुदच्यते

पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः ॥

Om Pūrṇamadah(ph) Pūrṇamidaṃ(m) PūrṇātPūrṇamudacyate|

Pūrṇasya Pūrṇamādāya Pūrṇamevāvashiṣyate ||

Om Shāntih(ś) Shāntih(ś) Shāntih ||

